# काव्यप्रकाशः प्रथमोल्लासः

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत्परामृशति

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।

नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।।1 ।।

**नियत्या कृतो नियमः, तेन रहिता ताम्**

**नियतिः** = अदृष्टं, आमुष्मिकस्वर्गादिजनकं तत्कृतो नियमः स्वर्गादियोग्यशरीरान्तरोत्पादनद्वारा स्वर्गोपधायकत्वरूपः तद्रहितामिति

**ह्लादैकमयीम्** = सुखमात्रस्वरूपाम्। तत्प्रकृतवचने मयट् इत्यनेन एकं (वस्तु) प्राचुर्येण प्रस्तुतं यस्यां सा, एकमयी, ह्लादेन एकमयी, ताम्

**अनन्यपरतन्त्राम्** = अन्यस्य भारतीभिन्नस्य (समवाय्यसमवायिनिमित्तरूपकारणस्य) परतन्त्रा न भवति ताम्

**नवरसरूचिराम्** = नव सङ्ख्याकाः रसाः (श्रृङ्गारादयः) यस्यां सा, नवरसा, नवरसा चासौ अत एव रुचिरा ताम्

**निर्मितम्** = निर्माणम् **आदधती** = प्रकाशयन्ती **कवेः**= काव्यकर्तुः (मृदब्रवीत् आपोऽब्रुवन् इत्यादिवत् अधिष्ठात्रधिष्ठेययोरभेदसम्बन्धेन काव्याधिष्ठातृदेवता च) **भारती** = काव्यम् **जयति** = सर्वोत्कर्षेण वर्ततेति।

**आर्यागीतिश्छन्दः यथा-**

**यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि।**
**अष्टादश द्वितीये पञ्चदश चतुर्थके सार्या।।**

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा षड्रसा न च हृद्यैव तैः तादृशी ब्रह्मणो निर्मितनिर्माणम् । एतद्विलक्षणा तु कविवाङ्निर्मितिः । अत एव जयति । जयत्यर्थेन च नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते ।

इहाभिधेयं सप्रयोजनमित्याह-

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये |

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे || 2 ||

कालिदासानादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम् आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्।

सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूत् विगलिदवेद्यान्तरमानन्दम्।

प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।।

एवमस्य प्रयोजनमुक्त्वा कारणमाह-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।। 3 ।।

# धन्यवादः